# साहित्यदर्पणः

(शास्त्री-प्रथमवर्षम्, पञ्चमं प्रश्नपत्रम्, साहित्यदर्पणस्य प्रथमपरिच्छेदः दशमपरिच्छेदस्य शब्दालङ्काराश्च)

डॉ. जितेन्द्र तिवारी
साहित्यविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः
एकलव्यपरिसरः, अगरतला, त्रिपुरा

1. साहित्यदर्पणस्य रचयिता कः ?
उ. कविराजविश्वनाथः ।
2. आचार्यविश्वनाथस्य समयः कः ?
उ. चतुर्दश-शताब्दी (14th Century) ।
3. आचार्यविश्वनाथस्य पितुः नाम किम् ?
उ. श्रीकविपण्डित-चन्द्रशेखरः।
4. आचार्यविश्वनाथस्य पितामहस्य नाम किम् ?
उ. श्रीनारायणः ।
5. साहित्यदर्पणे किं नामधेयोऽध्यायाः विभक्ताः कति च ?
उ. परिच्छेदनाम्ना दशाध्यायाः वर्तन्ते । (दश परिच्छेदाः सन्ति) ।
6. साहित्यदर्पणस्य प्रथमपरिच्छेदस्य नाम किम् ?
उ. काव्यस्वरूपनिरूपणम् ।
7. आचार्यविश्वनाथः मङ्गलपद्ये कां देवतां स्मरति ?
उ. सरस्वतीम् ।
8. साहित्यदर्पणस्य मङ्गलपद्ये किं छन्दः ?
उ. आर्या – छन्दः ।
9. **‘शरदिन्दुसुन्दररुचिः’** इति पदस्य विग्रहं लिखत।
उ. शरदि = शरद् ऋतौ, इन्दुः = चन्द्रः, सुन्दरी = मनोहरा, रुचिः = प्रभा, यस्याः सा । शरदिन्दुरिव सुन्दररुचिः ।
10. साहित्यदर्पणस्य मङ्गलपद्ये कः अलङ्कारः ?
उ. उपमा अलङ्कारः ।
11. **‘प्रकाशयतु’** इत्यत्र कः धातुः कश्च लकारः ?
उ. प्र उपसर्गपूर्वकं काश् धातुः लोट् लकारः प्रथमपुरुषैकवचनम् ।
12. **‘वाग्देवता’** इति पदस्य कः अर्थः ?
उ. वाण्याः देवता अर्थात् सरस्वती ।

13. साहित्यदर्पणस्य काव्यप्रयोजनं किम् ?

उ. चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि। काव्यादेव यतस्तेन तत् स्वरूपं निरूप्यते ।।

14. चतुर्वर्गः कः ?

उ. धर्मः अर्थः कामः मोक्षः इति चतुर्वर्गः ।

15. रामादिवत् प्रवर्तितव्यम् इत्यस्य कः भावः ?

उ. गुरुजनाज्ञापालनसज्जनसंरक्षणदुष्टनिग्रहरूपा प्रवृत्तिः करणीया इति भावः ।

16. न रावणादिवत् इत्यस्य कः भावः ?

उ. रावणादिना तुल्यं परदारहरणसज्जनसंहरणादिरूपा प्रवृत्तिः न करणीया इति भावः ।

17. शास्त्रं नाम किम् ?

उ. प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा । पुंसां येनोपदिश्येत तच्छास्त्रमिति कथ्यते ।।

18. आचार्य-भामहस्य काव्यप्रयोजनं किम् ?

उ. धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च । करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ।।

19. साधुकाव्यनिवेषणम् इत्यस्य कः आशयः ?

उ. सत्काव्यस्य परिशीलनम् इति ।

20. कामधुक् इत्यस्य कः अर्थः ?

उ. कामान्दोग्धीति, इच्छापूरकः इत्यर्थः ।

21. मम्मटस्य काव्यप्रयोजनं किम् ?

उ. काव्यं यशसेऽर्थकृते, व्यवहारविदे, शिवेतरक्षतये ।
सद्यः परनिर्वृतये, कान्तासम्मिततयोपदेशयुजे ।।

22. परिणतबुद्धीनाम् इत्यस्य कः अर्थः ?

उ. परिपक्वबुद्धीनाम् इति ।

23. अग्निपुराणे काव्यस्य उपादेयत्वं किम् ?

उ. नरत्वं दुर्लभं लोके, विद्या तत्र सुदुर्लभा । कवित्वं दुर्लभं तत्र, शक्तिस्तत्र सुदुर्लभा । इति

24. शक्तिः इति पदस्य कः आशयः ?

उ. कवित्वबीजरूपः संस्कारविशेषः शक्तिः इति ।

25. त्रि-वर्गाः के ?

उ. धर्मार्थकामाः इति ।

26. त्रि-वर्गसाधनं किम् ?

उ. त्रि-वर्गसाधनं नाट्यम् ।

27. विष्णुपुराणे काव्यप्रयोजनं किम् ?

उ. काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च । शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः।।

28. आचार्यमम्मटस्य काव्यस्वरूपं (काव्यलक्षणम्) किम् ?

उ. तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि ।

29. **'न्यक्कारो ह्ययमेव मे यदरयः'** इत्यत्र कः दोषः ?

उ. विधेयाविमर्शदोषः

30. **'सोऽप्यत्रैव'** इत्यस्य विच्छेदं कुरुत ।

उ. सः अपि अत्र एव ।

31. श्रुतिदुष्टादयो दोषा........ इति सम्पूर्णकारिकां लिखत ।

उ. श्रुतिदुष्टादयो दोषा अनित्या ये च दर्शिताः । ध्वन्यात्मन्येव शृङ्गारे ते हेया इत्युदाहृताः ।।

32. कीटानुविद्धरत्नादि.........इति सम्पूर्णकारिकां लिखत ।

उ. कीटानुविद्धरत्नादिसाधारण्येन काव्यता । दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः ।।

33. रसस्याङ्गिनो धर्माः के ?

उ. माधुर्योजप्रासादाख्याः गुणाः ।

34. काव्यस्य शरीरं किम् ?

उ. शब्दार्थौ शरीरम् ।

35. काव्यस्य आत्मा कः ?

उ. रसादिश्चात्मा ।

36. काव्ये शौर्यादिवत् के भवन्ति ?

उ. गुणाः शौर्यादिवत् । (माधुर्य-ओज-प्रासादाख्याः गुणाः)

37. काव्ये काणत्वादिवत् के ?

उ. दोषाः काणत्वादिवत् ।

38. काव्ये अवयवसंस्थानविशेषवत् के ?

उ. रीतयोऽवयवसंस्थानविशेषवत् ।

39. काव्ये कटककुण्डलादिवत् के ?

उ. अलङ्काराः कटककुण्डलादिवत् ।

40. आचार्यकुन्तकस्य काव्यलक्षणं (काव्यस्वरूपम्) किम् ?

उ. वक्रोक्तिः काव्यजीवितम् ।

41. **'चैत्रक्षपा'** इति पदस्य अर्थः कः ?

उ. मधुरात्रयः / वसन्तरात्रयः ।

42. **'रेवारोधसि'** इत्यस्मिन् पदे का विभक्तिः ?

उ. सप्तमी विभक्तिः ।

43. **'सुरतव्यापारलीलाविधौ'** इत्यस्य कः अर्थः ?

उ. रतिक्रियाविलासविधाने इति ।।

44. **'सरस्वतीकण्ठाभरणम्'** कस्य रचाना ?

उ. भोजराजस्य ।

45. सरस्वतीकण्ठाभरणे काव्यस्वरूपं किम् ?

उ. अदोषं गुणवत् काव्यमलङ्कारैरलङ्कृतम् । रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति ।।

46. ध्वनिकारः कः ?

उ. आनन्दवर्धनाचार्यः ।

47. आनन्दवर्धनाचार्यस्य काव्यस्वरूपं किम् ?

उ. काव्यस्यात्मा ध्वनिः इति ।

48. ध्वनेः रूपत्रयं किम् ?

उ. वस्तु-अलङ्कार-रस इति ।

49. श्वश्रूरत्र निमज्जति............ सम्पूरयत।

उ. श्वश्रूरत्र निमज्जति, अत्राहं, दिवसकं प्रलोकय ।
मा पथिक ! रात्र्यन्धक ! शय्यायां मम निमङ्क्ष्यसि ।।

50. **'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्'** इति कस्य पुराणस्य उक्तिः ?

उ. अग्निपुराणस्य ।

51. **'काव्यस्यात्मनि संज्ञिनि, रसादिरूपे न कस्यचिद् विमतिः'** इति केन उक्तम् ?

उ. व्यक्तिविवेककारेण आचार्यमहिमभट्टेन उक्तम् ।

52. **'नहि कवेरितिवृत्तमात्रनिर्वहिणात्मपदलाभः, इतिहासादेरेव तत्सिद्धेः'** इति केन उक्तम् ?

उ. ध्वनिकारेण आनन्दवर्धनाचार्येण उक्तम् ।

53. आचार्यवामनेन कः ग्रन्थः लिखितः ?

उ. काव्यालङ्कारः ।

54. आचार्यवामनस्य काव्यस्वरूपं किम् ?

उ. रीतिरात्मा काव्यस्य इति ।

55. ध्वनिकारस्य कारिका –

उ. अर्थः सहृदयश्लाघ्यः काव्यात्मा यो व्यवस्थितः ।
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ ।।

56. ध्वनेः भेदद्वयं किम् ?

उ. वाच्यम्, प्रतीयमानम् इति द्वौ भेदौ ।

57. साहित्यदर्पणानुसारं काव्यस्वरूपं (काव्यलक्षणम्) किम् ?

उ. **वाक्यं रसात्मकं काव्यम्** इति ।

58. साररूपतया जीवनाधायकः कः ?

उ. रसः एव ।

59. **'वासगृहं शून्यं विलोक्य'** इत्यस्य कः अर्थः ?

उ. गर्भाऽगारं (प्रकोष्ठं) शून्यं – विविक्तं सखीजनरहितमिति, विलोक्य – दृष्ट्वा ।

60. लज्जानम्रमुखी का ?

उ. बाला अर्थात् तरुणी (नवपरिणीता वधूरित्यर्थः) ।

61. **'रसः'** इति शब्दस्य प्रकृतिप्रत्ययं लिखत ।

उ. रस आस्वादने इति धातोः कर्मकर्तरि घञ् प्रत्ययः कृते सति रसः इति शब्दः निष्पद्यते ।

62. **'रसः'** इति शब्दस्य व्युत्पत्तिं लिखत ।

उ. रस्यते आस्वाद्यते इति रसः ।।

63. **'शून्यं वासगृहं विलोक्य शयनात्'** इत्यस्मिन् उदाहरणे कः रसः ?

उ. सम्भोगशृङ्गाराख्यो रसः ।

64. भावस्य लक्षणं किम् ?

उ. सञ्चारिणः प्रधानानि देवादिविषया रतिः । उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते ।।

66. दितिसुताधीशः कः ?

उ. हिरण्यकशिपुः इति ।

67. **'शल्कसीम्नि'** इत्यस्मिन् का विभक्तिः ?

उ. सप्तमी विभक्तिः ।

68. रसाभासस्य उदाहरणं लिखत ।

उ. मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः ।

69. काव्ये दोषाः किं स्वरूपाः ?

उ. दोषास्तस्यापकर्षकाः ।

70. दोषाः –

उ. श्रुतिदुष्टापुष्टार्थत्वादयः कारणत्वखञ्जत्वादय इव, शब्दार्थद्वारेण देहद्वारेणेव, व्यभिचारिभावादेः स्वशब्दवाच्यत्वादयो मूर्खत्वादय इव साक्षात् काव्यस्यात्मभूतं रसमपकर्षयन्तः काव्यस्यापकर्षका इत्युच्यन्ते ।

71. काव्ये गुणां किं स्वरूपाः ?

उ. उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः । इति ।

72. गुणाः –

उ. गुणाः शौर्यादिवत्, अलङ्काराः कटककुण्डलादिवत्, रीतयोऽवयवसंस्थानविशेषवत्, देहद्वारेणेव शब्दार्थद्वारेण तस्यैव काव्यस्यात्मभूतं रसमुत्कर्षयन्तः काव्यस्योत्कर्षका इत्युच्यन्ते ।

73. गुणाभिव्यञ्जकाः शब्दा कस्य उत्कर्षकाः भवन्ति ?

उ. गुणाभिव्यञ्जकाः शब्दा रसस्योत्कर्षकाः भवन्ति ।

74. आचार्यविश्वनाथस्य उपाधयः –

साहित्यार्णवकर्णधारः, ध्वनिप्रस्थापनपरमाचार्यः, कविसूक्तिरत्नाकरः, अष्टादशभाषावारविलासिनीभुजङ्गः, सान्धिविग्रहिकः, सङ्गीतविद्याधरः, आलङ्कारिकः, कलाविद्यामालतीमधुकरः, कविराजः ।

75. साहित्यदर्पणानुसारम् **अलङ्कारलक्षणं** किम् ?

उ. शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः ।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत् ।।

76. शरीरशोभातिशायिनः के ?

उ. अङ्गदादयः / केयूरादयः ।

77. शब्दार्थशोभातिशायिनः रसादेरुपकारकाः के ?

उ. अनप्रासोपमादयः अलङ्काराः ।

78. पुनरुक्तवदाभासस्य लक्षणं लिखत ।

उ. आपाततो यदर्थस्य पौनरुक्त्येन भासनम् । पुनरुक्तवदाभासः, स भिन्नाकारशब्दगः ।।

79. **'शुभ्रांशुः'** इति पदस्य कः अर्थः ?

उ. श्वेतकिरणः ।

80. अनपप्रासालङ्कारस्य लक्षणं किम् ?

उ. अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत् ।

81. **'अनुप्रास'** इति पदस्य व्युत्पत्तिं लिखत ।

उ. रसाद्यनुगतत्वेन प्रकर्षेण न्यासोऽनुप्रासः इति ।

82. अनुप्रासालङ्करस्य कति भेदाः के च ते ?

उ. पञ्च भेदाः । 1. छेकानुप्रासः 2. वृत्यनुप्रासः 3. श्रुत्यनुप्रासः 4. अन्त्यानुप्रासः 5. लाटानुप्रासश्च ।

83. छेकानुप्रासस्य लक्षणं किम् ?

उ. छेको व्यञ्जनसङ्घस्य सकृत्साम्यमनेकधा ।

84. छेकानुप्रासस्य उदाहरणं लिखत ।

उ. आदाय बकुलगन्धानन्धीकुर्वन् पदे पदे भ्रमरान् ।
अयमेति मन्दमन्दं कावेरीवारिपावनः पवनः ।।

85. वृत्यनुप्रासस्य लक्षणं लिखत ।

उ. अनेकस्यैकधा साम्यमसकृत् वाप्यनेकधा ।
एकस्य सकृदप्येष वृत्यनुप्रास उच्यते ।।

86. **'वृत्यनुप्रास'** इति पदस्य व्युत्पत्तिं प्रदर्शयत ।

उ. रसविषयव्यापारवती वर्णरचना वृत्तिः, तदनुगतत्वेन प्रकर्षेण न्यसनाद् वृत्यनुप्रासः ।

87. श्रुत्यनुप्रासस्य लक्षणं किम् ?

उ. उच्चार्यत्वाद्यदेकत्र स्थाने तालुरदादिके ।
सादृश्यं व्यञ्जनस्यैव श्रुत्यनुप्रास उच्यते ।।

88. श्रुत्यनुप्रासस्य उदाहरणं लिखत ।

उ. दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनीस्ताः स्तुमो वामलोचनाः ।।

89. **'वामलोचनाः'** इत्यस्य कः अर्थः ?

उ. सुन्दरीः । वामे – सुन्दरे, लोचने – नयने, यासां ताः वामलोचनाः ।

90. अन्त्यानुप्रासस्य लक्षणं लिखत ।

उ. व्यञ्जनं चेद्यथावस्थं सहाद्येन स्वरेण तु ।
आवर्त्यतेऽन्त्ययोज्यत्वात् अन्त्यानुप्रास एव तत् ।।

91. अन्त्यानुप्रासस्य उदाहरणम् –

उ. केशः काशस्तबकविकासः, कायः प्रकटितकरभविलासः ।
चक्षुर्दग्धवराटककल्पं, त्यजति न चेतः काममनल्पम् ।।

92. **'मन्दं हसन्तः पुलकं वहन्तः'** इति कस्य अलङ्कारस्य उदाहरणम् ?

उ. अन्त्यानुप्रासालङ्कारस्य ।

93. लाटानुप्रासस्य लक्षणं लिखत ।

उ. शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्यमात्रतः । लाटानुप्रास इत्युक्तः ------।

94. लाटानुप्रासस्य उदाहरणम् –

उ. स्मेरराजीवनयने नयने किं निमीलिते ।
पश्य निर्जितकन्दर्पं कन्दर्पवशगं प्रियम् ।।

95. **'नयने तस्यैव नयने च'** इत्यत्र कः अलङ्कारः ?

उ. लाटानप्रासः ।

96. यस्य न सविधे दयिता...... इत्यत्र कः अलङ्कारः ?

उ. लाटजनप्रियत्वात् लाटानुप्रासः ।

97. यमकालङ्कारस्य लक्षणं किम् ?

उ. सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः ।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ।।

98. यमकालङ्कारस्य उदाहरणम् –

उ. नवपलाश-पलाशवनं पुरः स्फुटपराग-परागत-पङ्कजम् ।
मृदुल-तान्त-लतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः ।।

99. वक्रोक्ति-लक्षणं लिखत ।

उ. अन्यस्यान्यार्थकं वाक्यमन्यथा योजयेद्यदि ।
अन्यः श्लेषेण काक्वा वा सा वक्रोक्तिस्ततो द्विधा ।।

100. वक्रोक्तेः भेदद्वयं लिखत ।

उ. 1. श्लेषवक्रोक्तिः 2. काकुवक्रोक्तिः ।

101. श्लेषवक्रोक्तेः उदाहरणं किम् ?

उ. के यूयं ? स्थल एव सम्प्रति वयं, प्रश्नो विशेषाश्रयः ...........।।

102. काकुवक्रोक्तेः उदाहरणं किम् ?

उ. काले कोकिलवाचाले सहकारमनोहरे । कृतागसः परित्यागात् तस्याश्चेतो न दूयते ।।

103. भाषासम अलङ्कारस्य लक्षणं किम् ?

उ. शब्दैरेकविधैरेव भाषासु विविधास्वपि ।
वाक्यं यत्र भवेत् सोऽयं भाषासम इतीष्यते ।।

104. श्लेषालङ्कारस्य लक्षणं लिखत ।

उ. श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते ।।

105. श्लेषालङ्कारस्य भेदाः -

उ. अष्टौ । वर्णप्रत्ययलिङ्गानां प्रकृत्योः पदयोरपि । श्लेषाद्विभक्तिवचनभाषाणामष्टधा च सः ।।
1. वर्णश्लेषः 2. प्रत्ययश्लेषः 3. लिङ्गश्लेषः 4. प्रकृतिश्लेषः 5. पदश्लेषः 6. विभक्तिश्लेषः 7. वचनश्लेषः 8. भाषाश्लेषः ।

106. विभक्तिश्लेषस्य उदाहरणं लिखत ।

उ. सर्वस्वं हर सर्वस्य त्वं भवच्छेदतत्परः । नयोपकारसांमुख्यम् आयासि तनुवर्तनम् ।।

107. पुनः श्लेषालङ्कारः त्रिप्रकारकः भवति –

उ. 1. सभङ्गश्लेषः 2. अभङ्गश्लेषः 3. सभङ्गाभङ्गश्लेषः ।

108. चित्रकाव्यं किम् ?

उ. पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते ।

109. पद्मबन्धस्य उदाहरणम् –

उ. मारमा सुषमा चारु-रुचा मारवधूत्तमा ।
मात्तधूर्ततमावासा सा वामा मेऽस्तु मा रमा ।।

110. प्रहेलिकायाः लक्षणं लिखत ।

उ. रसस्य परिपन्थित्वान्नालङ्कारः प्रहेलिका ।
उक्तिवैचित्र्यमात्रं सा च्युतदत्ताक्षरादिका ।।

111. प्रहेलिकायाः कति भेदाः ?

उ. त्रयः भेदाः । 1. च्युताऽक्षरा 2. दत्ताऽक्षरा 3. च्युतदत्ताऽक्षरा । इति ।

112. प्रहेलिकायाः उदाहरणं लिखत ।

उ. कूजन्ति कोकिलाः साले यौवने फुल्लमम्बुजम् ।
किं करोतु कुरङ्गाक्षी वदनेन निपीडिता ।।

113. क्रियागुप्तिम् उदाहरत ।

उ. पाण्डवानां सभामध्ये दुर्योधन उपागतः । तस्मै गां च सुवर्णं च सर्वाण्याभरणानि च ।।

114. अलङ्कारः कतिविधः ?

उ. त्रिविधः । 1. शब्दालङ्कारः 2. अर्थालङ्कारः 3. उभयालङ्कारः ।

115. साहित्यदर्पणस्य दशमपरिच्छेदस्य नाम किम् ?

उ. अलङ्कारविवेचनो नाम दशमः परिच्छेदः ।

116. आचार्यविश्वनाथस्य रचनाः –

उ. 1. राघवविलासम् - महाकाव्यम्
2. कुवलयाश्वचरितम् – प्राकृतकाव्यम्
3. चन्द्रकला – नाटिका
4. प्रभावतीपरिणयम् – नाटकम्
5. प्रशस्तिरत्नावली – षोडशभाषानिर्मितकरम्भकम्
6. नरसिंहविजयम् – खण्डकाव्यम्
7. कंसवधम् – काव्यम्
8. साहित्यदर्पणः – काव्यशास्त्रीयग्रन्थः
9. काव्यप्रकाशदर्पणः – काव्यप्रकाशटीका

x-x-x

© डॉ. जितेन्द्रतिवारी, साहित्यविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, एकलव्यपरिसरः, अगरतला, त्रिपुरा, (मो. 9039 712018)